**1.** “स नः पितेव सूनवेऽग्ने सूपायनो भव” अस्य मन्त्रस्य ऋषिर्वर्तते –

(A) वसिष्ठः

(B) मधुछन्दाः

(C) कण्वः

(D) अङ्गिरा

**2.** “वज्रहस्तः” इति विशेषणं कस्य देवस्य ?

(A) उषसः

(B) विष्णोः

(C) अग्नेः

(D) इन्द्रस्य

**3.** “माध्यान्दिनशाखा” कस्य वेदस्य ?

(A) यजुर्वेदस्य

(B) ऋग्वेदस्य

(C) अथर्ववेदस्य

(D) कस्यापि न

**4.** “आ वो वृणे सुमतिं यज्ञियानाम्” मन्त्रांशोऽयं कस्य – सूक्तस्य वर्तते ?

(A) पुरूरवा-उर्वशी सूक्तस्य

(B) यमयमी-सूक्तस्य

(C) सरमा-पणि सूक्तस्य

(D) विश्वामित्र-नदी-सूक्तस्य

**5.** “कदा सूनुः पितरं जात इच्छात्” मन्त्रांशोऽयं वर्तते –

(A) विश्वामित्र-नदी-सूक्ते

(B) यम-यमी-सूक्ते

(C) पुरूरवा-उर्वशी-सूक्ते

(D) सरमा-पणि-सूक्ते

**6.** नक्षत्रसम्पातादिना वेदकालं कः प्रतिपादयति ?

(A) बालगङ्गाधरतिलकः

(B) महर्षि दयानन्दः

(C) सायणः

(D) मैक्समूलरः

**7.** गोपथ ब्राह्मणं केन वेदेन सम्बद्धमस्ति ?

(A) ऋग्वेदेन

(B) सामवेदेन

(C) अथर्ववेदेन

(D) यजुर्वेदेन

**8.** ईशोपनिषद् केन वेदेन सम्बद्धा ?

(A) ऋग्वेदेन

(B) अथर्ववेदेन

(C) कृष्णयजुर्वेदेन

(D) शुक्लयजुर्वेदेन

**9.** माण्डूकी शिक्षा कस्य वेदस्य ?

(A) अथर्ववेदस्य

(B) सामवेदस्य

(C) यजुर्वेदस्य

(D) ऋग्वेदस्य

**10.** वेदाङ्गेषु श्रोत्रत्वेन उपमीयते

(A) ज्योतिषम्

(B) छन्दःशास्त्रम्

(C) निरूक्तम्

(D) शिक्षा

**11.** अधोङ्कितानां समीचीनम् उत्तरं चिनुत –

| | |
|---|---|
| (a) प्रश्नोपनिषद् | 1. निरूक्तम् |
| (b) पञ्चविंशब्राह्मणम् | 2. अथर्ववेदः |
| (c) अथेदं भस्मान्तं शरीरम् | 3. सामवेदः |
| (d) व्याप्तिमत्त्वातु शब्दस्य | 4. ईशोपनिषद् |

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 4 | 1 | 2 | 3 |
| (B) | 1 | 3 | 4 | 2 |
| (C) | 2 | 3 | 4 | 1 |
| (D) | 3 | 4 | 1 | 2 |

**12.** कल्पग्रन्थेषु गण्यते

(A) कात्यायनश्रौतसूत्रम्

(B) उणादिसूत्रम्

(C) जैमिनीयसूत्रम्

(D) सांख्यसूत्रम्

**13.** विकृतिपाठाः कियन्तः ?

(A) 9

(B) 10

(C) 6

(D) 8

**14.** अनिर्वचनीयवाहिनः के ?

(A) वैशेषिकाः

(B) पूर्वमीमांसकाः

(C) बौद्धाः

(D) अद्वैतवेदान्तिनः

**15.** केवलविकृतिरूपात्मकानि तत्त्वानि कति ?

(A) षोडश

(B) नव

(C) पञ्च

(D) पञ्चविंशति:

**16.** अव्यक्तं कीदृशं तत्त्वं निरूपितम् ?

(A) चेतनम्

(B) उदासीनम्

(C) जडम्

(D) अभावरूपम्

**17.** प्रत्ययसर्ग: कतिविध: ?

(A) पञ्चाशद्विध:

(B) नवविध:

(C) शतविध:

(D) सप्तविध:

**18.** शाण्डिल्यविद्याविषय: कुत्र निर्दिष्ट: ?

(A) माण्डूक्योपनिषदि

(B) छान्दोग्योपनिषदि

(C) बृहदारण्यके

(D) कठोपनिषदि

**19.** काम्यकर्माणि एवं विधानि निरूपितानि –

(A) अकरणे पापसाधनानि

(B) निमित्तवशात् कृतानि

(C) पापविनाशसाधनानि

(D) फलोद्देश्येन विधीयमानानि

**20.** वेदान्तसारानुसारम् अज्ञानं किंरूपं भवति ?

(A) भावरूपम्

(B) अभावरूपम्

(C) शून्यरूपम्

(D) निष्क्रियरूपम्

**21.** निर्वातदीपवदचलं भवति –

(A) सविकल्पकसमाधि:

(B) सगुणब्रह्मस्वरूपम्

(C) समष्टिजीवस्वरूपम्

(D) निर्विकल्पकसमाधि:

**22.** गन्धं प्रति पृथिवी भवति –

(A) समवायिकारणम्

(B) असमवायिकारणम्

(C) निमित्तकारणम्

(D) उपादानकारणम्

**23.** सपक्षस्योदाहरणं विद्यते –

(A) महाह्रद:

(B) पर्वत:

(C) महानस:

(D) आकाश:

**24.** प्रागभावस्य लक्षणं भवति –

(A) सादिरनन्त:

(B) त्रैकालिकसंसर्गाभाव:

(C) अनादि: सान्त:

(D) तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिता-काभाव:

**25.** अधोनिर्दिष्टानां समीचीनां तालिकां विचिनुत –

(a) आप्तवाक्यम् — 1. आप्त:

(b) अर्थाबाध: — 2. सन्निधि:

(c) पदानाम-विलम्बेनोच्चारणम् — 3. शब्द:

(d) यथार्थवक्ता — 4. योग्यता

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 4 | 3 | 2 | 1 |
| (B) | 3 | 4 | 1 | 2 |
| (C) | 3 | 4 | 2 | 1 |
| (D) | 1 | 2 | 3 | 4 |

**26.** 'ग्रामणी + सु > स्' इत्यत्र अपृक्तसंज्ञा कस्य भवति ?

(A) 'सु' इत्यस्य ।

(B) 'स्' इत्यस्य ।

(C) 'ग्रामणी' इत्यस्य ।

(D) 'ग्रामणी + सु' इत्यस्य ।

**27.** अस्य शब्दस्य नदीसंज्ञा नास्ति –

(A) नदी

(B) साध्वी

(C) स्त्री:

(D) ग्रामणी:

**28.** कारकप्रयोगदृष्ट्या वाक्यमिदम् शुद्धम् अस्ति –

(A) भक्त: रोचते भक्ति: ।

(B) देवदत्तम् श्लाघते ।

(C) वैकुण्ठम् अध्यास्ते हरि: ।

(D) वैकुण्ठे अध्यास्ते हरि: ।

**29.** 'पुष्पाणि स्पृह्यति ।' – इत्यत्र 'पुष्पाणि' इति पदम् अस्ति –

(A) ईप्सिततमम् ।

(B) ईप्सितम् ।

(C) अनीप्सितम् ।

(D) अनीप्सिततमम् ।

**30.** परिक्रयणे सम्प्रदानमन्यतरस्याम् । – इति सूत्रेण अन्यतरस्याम् का संज्ञा भवति ?

(A) अपादानसंज्ञा ।

(B) करणसंज्ञा ।

(C) कर्मसंज्ञा ।

(D) अधिकरणसंज्ञा ।

**31.** 'उपपदविभक्ते: कारकविभक्ति: बलीयसी' – इत्यस्य उदाहरणम् अस्ति –

(A) रामम् नमामि ।

(B) नमस्करोति देवान् ।

(C) गुरुणा सह शिष्य: गच्छति ।

(D) यागाय याति ।

**32.** 'सुमद्रम्' इत्यत्र 'सु' अव्ययस्यार्थ: –

(A) समीपम् ।

(B) शोभनम् ।

(C) समृद्धि: ।

(D) युगपत् ।

**33.** तत्पुरुषे समासे कस्य पदार्थस्य प्रधानता भवति ?

(A) पूर्वपदार्थस्य ।

(B) उत्तरपदार्थस्य ।

(C) अन्यपदार्थस्य ।

(D) उभयपदार्थस्य ।

**34.** 'राजदन्ता:' अस्य लौकिकम् विग्रहवाक्यम् भवति –

(A) राज्ञाम् दन्ता: ।

(B) दन्तानाम् राजान: ।

(C) दन्तानाम् राजानम् ।

(D) दन्त + आम् राजन् + जस् ।

**35.** कर्मधारयसंज्ञा भवति –

(A) अव्ययीभावस्य

(B) समानाधिकरणस्य तत्पुरुषस्य ।

(C) असमानाधिकरणस्य तत्पुरुषस्य ।

(D) समानाधिकरणस्य बहुव्रीहे: ।

**36.** भाषाविज्ञानदृशा अर्धस्वरो भवति –

(A) अ

(B) य्

(C) इ

(D) अ:

**37.** आर्यभाषापरिवारस्य भाषा न मन्यते –

(A) प्राकृतम्

(B) पालि

(C) संस्कृतम्

(D) तमिल

**38.** अधस्तनेषु एकाङ्कि रूपकमस्ति –

(A) प्रतिज्ञायौगन्धरायणम्

(B) चारूदत्तम्

(C) कर्णभारम्

(D) अविमारकम्

**39.** 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्' – इत्यस्ति

(A) रामायणे

(B) महाभारते

(C) रघुवंशे

(D) वेणीसंहारे

**40.** शाल्मलीवृक्षवर्णनं कस्मिन् काव्ये दृश्यते ?

(A) नलचम्पू:

(B) कादम्बरी

(C) हर्षचरितम्

(D) वासवदत्ता

**41.** संस्कृतवाङ्मये करुणरसस्य वर्णने क: विशिष्यते ?

(A) कालिदास:

(B) बाणभट्ट:

(C) अश्वघोष:

(D) भवभूति:

**42.** बृहत्त्रय्यामस्य ग्रन्थस्य गणना न भवति –

(A) किरातार्जुनीयस्य

(B) शिशुपालवधस्य

(C) कुमारसम्भवस्य

(D) नैषधीयचरितस्य

**43.** अकारणाविष्कृतवैरदारुणादसज्जनात् कस्य भयं न जायते – इति केन कविनोक्तम् ?

(A) कालिदासेन

(B) भारविणा

(C) श्रीहर्षेण

(D) बाणभट्टेन

**44.** "अधारि पद्मेषु तदङ्घ्रिणा घृणा

क्व तच्छयच्छायलवोऽपि पल्लवे ।" अस्मिन् पद्यांशे कस्य सौन्दर्यं वर्णितम् ?

(A) दमयन्त्या:

(B) नलस्य

(C) रामस्य

(D) सीताया:

**45.** अधस्तनयुग्मानां समीचीनां तालिकां चिनुत –

| | |
|---|---|
| (a) हर्ष: | 1. मुद्राराक्षस: |
| (b) भवभूति: | 2. स्वप्नवासवदत्तम् |
| (c) विशाखदत्त: | 3. उत्तररामचरितम् |
| (d) भास: | 4. रत्नावली |

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 3 | 2 | 4 | 1 |
| (B) | 4 | 3 | 1 | 2 |
| (C) | 2 | 1 | 3 | 4 |
| (D) | 1 | 4 | 2 | 3 |

**46.** मम्मटस्य व्यङ्ग्यमूलाव्यञ्जनाया: उदाहरणं वर्तते –

(A) नि:शेषच्युतचन्दनम्

(B) पश्य निश्चलनिष्पन्दा

(C) ग्रामतरुणम् तरुण्या

(D) माता गृहोपकरणम् नास्ति

**47.** रस: इति क: पदार्थ: ?

(A) आस्वाद्यमान:

(B) श्रवणपेय:

(C) भोज्यमान:

(D) दृश्यमान:

**48.** नाट्यशास्त्रानुसारं कति स्थायिभावा: ?

(A) नव

(B) अष्टौ

(C) दश

(D) सप्त

**49.** संग्रहकारिका-निरूक्तानां वर्णनं नाट्यशास्त्रस्य कस्मिन्नध्याये वर्तते ?

(A) द्वितीये

(B) तृतीये

(C) चतुर्थे

(D) षष्ठे

**50.** 'प्रकृतं प्रतिषिध्यान्यस्थापनं' चेत् तदा कोऽलङ्कार: ?

(A) उपमा

(B) भ्रान्तिमान्

(C) श्लेष:

(D) अपह्नुति: